दिनाङ्क :- 07.10.2026

प्रातः - 06:55

## प्रधानमन्त्री-शिखरसम्मेलनम्

प्रधानमन्त्री नरेन्द्रमोदी तथा स्विट्जरलैण्ड्-देशस्य राष्ट्रपतिः गाय् पार्मेलिन् (गी पार्मलाह्) च अद्य 'भारतमण्डपम' इत्यत्र द्वितीयं भारत-ईएफटीए-समृद्धि-शिखरसम्मेलनं सम्बोधयिष्यतः। भारत-ईएफटीए-व्यापार-आर्थिक-सहमति-सन्धेः प्रथमवार्षिकोत्सवस्य अवसरे सम्मेलनमिदम् आयोज्यते। अस्मिन् सम्मेलने भारतस्य तथा ईएफटीए-सङ्घटने अन्तर्भूतानां स्विट्जरलैण्ड्, नॉर्वे, आइसलैण्ड्, लिक्टेन्स्टाइन् चेत्येतेषां देशानां वरिष्ठाः प्रशासकीयाधिकारिणः, उद्योगक्षेत्रस्य नेतारः प्रमुखहितधारिणश्च सम्मिलिताः भविष्यन्ति। सम्मेलनस्य उद्देश्यम् आर्थिकसहकारं सुदृढीकर्तुं, व्यावसायिकसहमतिं प्रवर्धयितुं तथा व्यापार-निवेश-प्रौद्योगिकीसहकार-नवोन्मेष चेत्येतेषु क्षेत्रेषु नूतनानाम् अवसराणां सृजनम् अस्ति।

## भाजपा - प्रधानमन्त्रिणे कार्यक्रमः

प्रधानमन्त्रिणः नरेन्द्रमोदिनः सार्वजनिकजीवनयात्रा अद्यैव आरब्धा आसीत् यस्याः अद्य पञ्चविंशतिवर्षाणि पूर्णानि भवन्ति। अस्मिन् अवसरे प्रधानमन्त्री नरेन्द्रमोदी अथ भाजपादलस्य राष्ट्रियाध्यक्षः नितिननबीनः च अद्य ‘विकसितभारतसङ्कल्पसभां’ सम्बोधयिष्यतः। प्रधानमन्त्रिणः तथा भाजपादलस्य राष्ट्रियाध्यक्षस्य सम्बोधनाभ्यां सह दलस्य अनेके वरिष्ठनेतारः अपि उत्तरप्रदेशस्य विभिन्नेभ्यः प्रदेशेभ्यः दृश्यश्रव्य-परान्तर्जालीय-माध्यमेन कार्यक्रमे सहभागं करिष्यन्ति।

## मन्त्रिमण्डलस्य निर्णयः

केन्द्रीयमन्त्रिमण्डलेन बहुमाध्यमसम्बद्ध-परिवहन-योजनां सुव्यवस्थितां कर्तुम् एकीकृत-परिवहन-आपूर्ति-व्यवस्थापन-प्राधिकरणस्य स्थापनायै अनुमोदनं प्रदत्तम्। नवदिल्ल्यां प्रधानमन्त्रिणः नरेन्द्रमोदिनः अध्यक्षतायां सम्पन्नस्य मन्त्रिमण्डलोपवेशनस्य अनन्तरं वार्ताहरान् सम्बोधयन् सूचनाप्रसारणमन्त्री अश्विनीवैष्णवः उक्तवान् यत् इदं प्राधिकरणं दशवर्षीय-योजनावधिम् आधृत्य दीर्घकालिकं राष्ट्रिय-परिवहन-महायोजनापत्रं सज्जीकरिष्यति। सः उक्तवान् यत् इदं देशे एकीकृत-परिवहन-आपूर्ति-व्यवस्थापन-योजनायै शीर्षसंस्थारूपेण कार्यं करिष्यति।

श्रीवैष्णवः उक्तवान् यत् मन्त्रिमण्डलेन लघु-मध्यमोद्यमेषु स्वामित्वनिवेशाय दशसहस्रकोटिरूप्यकाणां लघु-मध्यमोद्यम-विकासनिधेः स्थापनायै अपि अनुमोदनं प्रदत्तम्।

## भारत-घाना-सन्धिः

भारत-घानादेशयोः मध्ये वैज्ञानिकानुसन्धानस्य, शैक्षणिकक्षेत्रस्य, क्षमतावर्धनस्य, कृष्यनुसन्धानस्य तथा शिक्षायाश्च क्षेत्रेषु सहकारं सुदृढीकर्तुं द्वयोः सन्धिज्ञापनपत्रयोः आदानप्रदानं जातम्। विदेशमन्त्रिणः डॉ. एस्. जयशङ्करस्य घानायात्रायाः समये एतयोः सन्धिज्ञापनपत्रयोः आदानप्रदानम् अभवत्।

डॉ. जयशङ्करस्य घानादेशस्य विदेशमन्त्रिणः सैम-ओकुडजेतो-अब्लक्वा इत्यस्य च मध्ये भारत-घानादेशयोः व्यापक-सहमतिं सुदृढीकर्तुं विस्तृतं विचारविनिमयं जातम्। ध्यातव्यम् इदं यत् विदेशमन्त्रिणः इयं यात्रा अस्य मासस्य दशदिनाङ्कपर्यन्तं प्रवर्तिष्यते।

**ऋतुविभागः**

भारतर्तुविज्ञान-विभागेन अद्य नागालैण्ड-मणिपुर-मिजोरम-त्रिपुरासु प्रबलवृष्टेः पूर्वानुमानं कृतम् अस्ति। ऋतुविभागेन अद्य पूर्वोत्तरप्रदेशे, पश्चिमोत्तरप्रदेशे, बिहार-हरियाणा-चण्डीगढ-दिल्ली-हिमाचलप्रदेशेषु च विद्युत्पातेन प्रबलवातैश्च सह गर्जनयुक्तवृष्टेः सम्भावना अपि व्यक्ता। अद्य झारखण्ड-छत्तीसगढ-केरल-ओडिशा-पञ्जाब-उत्तराखण्ड-पश्चिमबङ्गाल-सिक्किमेषु अपि समानैव ऋतु-परिस्थितयः प्रवर्तिष्यन्ते इति सम्भावना अस्ति।

**क्रिकेट्**

भारतेन ह्यः रात्रौ लखनऊनगरे क्रीड्यमाने प्रथम-विंशति-प्रतिविंशति-अन्ताराष्ट्रिय-क्रीडायां वेस्टइण्डीज्दलम् अष्टस्तोभैः पराजितम्। अनेन विजयेन भारतं पञ्चस्पर्धात्मिकायां शृङ्खलायाम् एकं शून्यम् इत्यन्तरेण अग्रे अस्ति।

।। इति वार्ताः।।